This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M124 विषय स्तोत्र
नाव. त्रिपुरसुंदरीस्तवराज (MSS)
लेखक/लिपीकार —
पृष्ठ 8 काळ — पूर्ण/~~अपूर्ण~~

त्रिपुरसुंदरीस्तवराज

38

श्रीगणेशायनमः॥भैरवउवाच॥अधुनाश्रृणुदे
वेशीस्तोत्रंतत्वनिरूपणं॥महात्रिपुरसुंदर्याःस
र्वार्थसारमुत्तमं॥१॥यस्यकस्यनवक्तव्यंनद्रष्ट
व्यंकदाचन॥यस्यकस्यनदातव्यंविनाशिष्याय
धीमते॥२॥ॐअस्यश्रीत्रिपुरसुंदरीपंचांगभू
तस्यस्तोत्रराजस्य॥दक्षिणामूर्त्तिऋषिः॥पं
क्तिश्छंदः॥श्रीमहात्रिपुरसुंदरीदेवता॥कए
ईलह्रींइतिबीजं॥हसकहलह्रींइतिशक्तिः॥

मूलेनषडंगन्यासः॥ध्यानं॥

सकलह्रींइतिकीलकं॥श्रीविद्याप्रीत्यर्थेजपेवि
नियोगः॥ॐभुभंवह्न्यारूढंकमलयुतमल्पे
ष्टफलदमबिह्निंदुंमंदोयदिजपतिबीजंतवशि
वे॥नदालस्यक्षोणीवलयममरेशार्चितपदो
भवेज्जप्त्वैकाकीनृपजनशिखाशेखरमणिः
॥१॥भून्यंयोदहनाधिरूढममलंवामाक्षि
णीसंयुतंसेंदुसुंदरिबिंदुबिंबखचितंयोमान
सेसंस्मरेत्॥मूकस्यापिसुरेंद्रसिंधुजलवद्वा
ग्देवताभारतीसद्यःपद्यमयीमुखाब्जकुहरा

द्देवेशिनिर्गच्छति॥२॥ककार्णंध्वांताक्षरमपरमा
त्रांचितमजंसबिंदुंचंद्राधांकितममलंचंद्रामृ
तमयं॥जपेद्योमंत्रेशोहृदयभवनेवीरजननित्व
दीयंनिःशंकंपदमवनिनाथःसलभते॥३॥वाग्भ
वंतवशिवेहृदिबीजंध्यायतेयदिनरोचलचेताः॥
तस्यतच्चरणपूजनमात्राद्दासतांभजतिमंदि
रेरमा॥४॥शक्तिबीजमनघंसुधाकरंसाधकोय
दिजपेद्धृदिभक्त्या॥तस्यदेववनिताचरणाब्जे
रंजयंतिमुकुटैर्मणियुक्तैः॥५॥तारार्णमेकमनु

मध्यसंस्थंयोध्यायतेसाधकश्चक्रवर्त्ती॥इहांगना
केलिविलासकारीपरत्रमुक्तःशतकल्पकोटिः॥६॥
मायाबीजंयोजपेत्ते महेशितत्वंमंत्रीभक्तिमान्मुक्ति
कांक्षी॥त्वत्सद्दृष्ट्यायातित्वद्धामरम्यंनाकस्त्रीभि
वीज्यमानःसुतालैः॥७॥लक्ष्मीबीजंसर्वमंत्रैक
नत्वंध्यायन्मंत्रीतावकंविश्वमातः॥भुक्त्वाभोगग
न्यातित्रैलोक्यराज्यंकृत्वास्थानंतावकंसाधके
न्द्रः॥८॥कृकाराख्यंकूटंभुवनविदितंतेजपति
योहृद्दलमंदोवा॥त्रिदशोजननीत्र्यक्षरपदे॥त्रिनेत्रो

विष्णुर्वाकमलनयनःपंकजभवोभजेद्दास्यंगाहे
जनानिसहसातस्यविदुषः॥९॥हकाराख्यंकूटं
विदितमतिगुप्तंगुणपरंगुणातीतंत्र्यर्णंहृदयरचि
तबीजंमणिमयं॥जपेद्ध्यायेद्भुक्तेविभवमनिशं
प्राप्यसहसासुरस्त्रीभिःसार्द्धंचरतिभुवनेनंद
नवने॥१०॥सकाराख्यंकूटंचतुर्वर्णसाध्यंपरंयो
जपेत्साधकोमानसेवा॥शिवोविष्णुरिंद्रोविरिंच्यो
महेशित्वदीयेष्टपुत्रंभजेत्साधकंतं॥११॥शान्तपा
र्णाढ्यंसाधकोन्तर्जपेद्योबीजंतेजोवर्द्धनंसप्रभा

ते॥सर्वांजित्वासाधकोवैरिसंघान्कुर्याद्राज्यंजन्मज
न्मांतरेपि॥१२॥वासनार्णमनिशंयोदिध्यायेद्धिंदुमंडि
लमसाध्यताकुलं॥वीरभूमिशयनेरिपून्निजांस्तान्वि
सृज्यभजतेधरामिमां॥१३॥कामराजमम्रत्तैकनिधा
नंयोजपेत्तवनरोहृदिभूत्यै॥सार्वभौमपरिपालितां
धरांधारयेद्धिसहसात्तवभत्त्या॥१४॥मायाबीजंदरि
मंत्रांतसंस्थंरात्रौवन्हिंध्यायतेसाधकोयः॥भूमीभृ
पास्तस्यपादाब्जयुगंरंजंतिस्वैर्मौलिरत्नांशुवर्गैः॥
१५॥त्वन्मंत्रांतरगंरमार्णमचलंपीयूषधाराधरंनत्वं
तथ्यमतंद्रितोजपतियोबीजंशिवेतावकं॥वश्यास्तस्य

धराभृदीश्वरसुतेगीर्वाणवामभ्रुवःपूज्यश्चापिमुनी
श्वरैःकविवरैःस्तुत्यःससेव्योनृपः॥१६॥श्रीसुंदरी
स्तववरंपठतेजपेच्चःश्रीमंत्रराजनिलयंविभवैक
हेतुं॥इष्टप्रदानसमयेभुविकल्पवृक्षंशीघ्रंप्रया
तित्रिदिवंसनरोविशिष्टः॥१७॥इतीदंपरमंतत्व
मंगभूतंहिपंचमं॥महात्रिपुरसुंदर्यास्तवराजंस्त
वो[redacted]त्तमं॥इदंपंचांगमनिशंसुंदर्याःसारमुत्त
मं॥गोप्यंगोप्यतरंगुह्यंगोपनीयंप्रयत्नतः॥१८॥
सदासदासदागुह्यंगोप्तव्यंपशुसंकटे॥राज्यंदेयंशि

रोदेयंनदेयाषोडशाक्षरी॥२०॥गुप्तमत्यंतगुप्तंच
गोपनीयंस्वयोनिवत्॥भ्रातृभ्योपिपुत्रेभ्यो
दत्वानरकमाप्नुयात्॥२१॥विनाशिष्यायनोदद्या
त्साधकाग्रेनगोपयेत्॥दुर्जनेभ्यःसदागोप्यंगु
प्तंचशरीरशारजन्मनः॥२२॥सर्वथागोपयेन्नि
त्यमित्याज्ञापरमेश्वरी॥इतिरुद्रयामलेतंत्रे
श्रीत्रिपुरसुंदरीस्तवराजःशुभदःसमाप्तः॥
श्रीमात्रिपुरसुंदरीराजराजेश्वरीदेव्यार्पणमस्तु॥

अस्यश्रीशुद्धशक्तिमालामंत्रस्य॥उपस्थेंद्रियाधि
ष्ठायीवरुणादित्यऋषिः॥गायत्रीछंदः॥सात्विकाहं
कारभट्टारकपीठस्थितकामेश्वरांकनिलयाकामेश्व
रीललितामहाभट्टारिकादेवता॥खड्गसिद्ध्येविनियो
गः॥तादृक्श्रीखड्गमाज्ञानियेनहस्तधृतेनवै॥अष्टाद
शानांद्वीपानांसम्राट्भोक्ताभविष्यति॥अथबालायाः
षडंगः॥ऐंक५अं-हृ-क्लींह५त-त्रि॰सौःस४म-त्रि॰
अना॰ ऐंक५क॰ [illegible] क्लींह५क॰ने॰॥सौःस४कर-अस्त्राय॰॥
ऐंह्रींश्रींॐनमस्त्रिपुरसुंदरिहृदयेदेविशिरोदेविशिखा

देवि कवचदेवि नेत्रदेव्यस्त्रदेवि कामेश्वरि भगमालिनि नि
त्यक्लिन्ने भेरुंडे वन्हिवासिनि महावज्रेश्वरि शिवदूती त्वरि
ते कुलसुंदरि नित्ये नीलपताके विजये सर्वमंगले ज्वा
लामालिनि चित्रे महानित्ये परमेश्वरपरमेश्वरि मित्रे
शनाथमयि षष्ठीशनाथमयि उड्डीशनाथमयि चर्या
नाथमयि लोपामुद्रामयि अगस्त्यमयि कालतापन
मयि धर्माचारमयि मुक्तकेशीश्वरमयि दीपकलाना
थमयि विष्णुदेवमयि प्रभाकरदेवमयि तेजोदेवमयि मनोजदेव·
कल्याणदेवमयि रत्नदेवमयि वासुदेवमयिं रामानं श्री

दमयि अणिमासिद्धे लघिमासिद्धे महिमासिद्धे गरिमा
सिद्धे ईशितसिद्धे वशितसिद्धे प्राकाम्यसिद्धे भुक्तिसिद्धे
इच्छासिद्धे प्राप्तिसिद्धे सर्वकामसिद्धे ब्राह्मी माहेश्वरी कौ
मारी वैष्णवी वाराही माहेंद्री चामुंडे महालक्ष्मी सर्वसंक्षो
भिणि सर्वविद्राविणि सर्वाकर्षिणि सर्ववशंकरि सर्वो
न्मादिनि सर्वमहांकुशे सर्वखेचरि सर्वबीजे सर्वयोनिस
र्वत्रिखंडे त्रैलोक्यमोहनचक्रस्वामिनि प्रकटयोगिनि
कामाकर्षिणि बुध्याकर्षिण्यहंकाराकर्षिणि शब्दाकर्षि
णि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गंधाकर्षिणिं

चित्ताकर्षिणिधैर्याकर्षिणिस्मृत्याकर्षिणिनामाकर्षिणि
बीजाकर्षिण्यात्माकर्षिण्यमृताकर्षिणिशरीराकर्षिणि
सर्वाशापरिपूरकचक्रस्वामिनिगुप्तयोन्यनंगकुसुमे
नंगमेखलेनंगमदनेनंगमदनातुरेनंगरेखेनंगवे
गिन्यनंगांकुशेनंगमालिनिसर्वसंक्षोभणचक्रस्वामि
निगुप्तयोगिनिसर्वसंक्षोभिणिसर्वविद्राविणिसर्वाक
र्षिणिसर्वाह्लादिनिसर्वसंमोहिनिसर्वस्तंभिनिसर्वजृं
भिणिसर्ववशंकरीसर्वरंजिनिसर्वोन्मादिनिसर्वार्थसा
धकेसर्वसंपत्तिपूरिणिसर्वमंत्रमयीसर्वद्वंद्वक्षयंकरि
धिनि॥

क्रैं

क
सर्वसौभाग्यदायचक्रस्वामिनिसंप्रदाययोगिनिसर्व
सिद्धिप्रदेसर्वसंपत्प्रदेसर्वप्रियंकरिसर्वमंगल
कारिणिसर्वकामप्रदेसर्वदुःखविमोचिनिसर्वमृ
त्युप्रशमनिसर्वविघ्ननिवारिणिसर्वांगसुंदरिसर्वसौ
भाग्यदायिनिसर्वार्थसाधकचक्रस्वामिनिकुलोत्ती
र्णयोगिनिसर्वज्ञेसर्वशक्तेसर्वैश्वर्यप्रदायिनिसर्व
ज्ञानमयिसर्वव्याधिविनाशिनिसर्वाधारस्वरूपेस
र्वपापहरेसर्वानंदमयिसर्वरक्षास्वरूपिणिसर्वेप्सि
तफलप्रदेसर्वरक्षाकरचक्रस्वामिनिनिगर्भयोगिनि

७

वज्रिणि कामेश्वरि मोदिनि विमले अरुणे जयिनि सर्वेश्वरि कौ
लिनि सर्वरोगहरचक्रस्वामिनि रहस्ययोगिनि बाणिनि चा
पिनि पाशिनि अंकुशिनि महाकामेश्वरि महावज्रेश्वरि महा
भगमालिनि महाश्री त्रिपुरसुंदरि सर्वसिद्धिप्रदचक्रस्वा
मिनि अतिरहस्ययोगिनि श्री महाभट्टारिके सर्वानंदम
यचक्रस्वामिनि परापररहस्ययोगिनि त्रिपुरे त्रिपुरे
शि त्रिपुर [illegible] सुंदरि त्रिपुरवासिनि त्रिपुराश्री त्रिपु
रमालिनि त्रिपुरसिद्धे त्रिपुरांबा महात्रिपुरसुंदरि महा
महेश्वरि महामहाराज्ञि महामहाशक्ते महामहागुप्ते
महामहाज्ञप्ते महामहानंदे महामहास्पंदे महामहाशये

श्री
वें
रा
७

[illegible]

महामहाश्रीचक्रनगर~~स्वामिनि~~ साम्राज्ञि नमस्ते न
मस्ते स्वाहा श्रीं ह्रीं ऐं [illegible] ॥ ॥ इति खड्गमाला समाप्तं
॥ एकत्रिंशत् सहस्राणि [illegible] लोक्यमोहनक्षम[illegible] ॥ मा
लामंत्रो महाराज्ञी सर्वसिद्धिप्रदायक: ॥ एषा विद्या
महासिद्धिदायिनी स्मृतिमात्रत: ॥ अग्निवातमहा
क्षोभे राजाराष्ट्रस्य विप्लवे ॥ समुद्रयानविक्षोभे
भूतप्रेतादिजे भये ॥ डाकिनी पूतनायक्षरक्ष: कू
ष्मांडजे भये ॥ अपस्मारज्वरव्याधिमृत्यून्मादादि
जे भये ॥ मित्रभेदे ग्रहभये व्यसनाभिचारके ॥

ऐं कावर्तनमात्रेण

अन्येष्वपि च दोषेषु मालामंत्रं स्मरेन्नरः ॥ सर्वोपद्रवनिर्मु
क्तोसर्वव्याधिविवर्जितः ॥ सर्वदा पूर्णहृदये साक्षात्तुशि
व समो भवेत् ॥ आपत्काले नित्यपूजा विस्तरात्कर्तुमक्ष
मः ॥ एकवारं जपेदेनं सर्वपूजाफलं लभेत् ॥ नवावर
णदेवीनां ललिताया महौजसः ॥ एकत्र गणनारूपो
मंत्रं मंत्रार्थगोचरः ॥ मालामंत्रो महादेव्याः सर्वकामा
र्थसिद्धिदः ॥ इदं स्तोत्रं महादेवी सर्वलोकविमोहनं ॥
सर्वसौख्यप्रदं नृणां सर्वसौभाग्यदायकं ॥ इति श्रील
लितापरषष्ठउमामहेश्वरसंवादे शुधशक्तिमाला
मंत्रं संपूर्णं ॥ श्री ललितादेव्यार्पणमस्तु ॥ त्रिपुरसुंदरी ॥ छ
वेदवेदांगगोचरः ॥ सर्वागमरहस्यार्थस्मरणात्पापनाशिनी ॥ ललितायामहे
शान्या मालाविद्यामहीयसी ॥

```
[OrderDescription]
,CREATED=09.08.19 12:04
,TRANSFERRED=2019/08/09 at 12:08:21
,PAGES=10
,TYPE=STD
,NAME=S0001418
,Book Name=M-124-TRIPUR SUNDARI SIVRAJ
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,
```